गजाननस्तोत्रं शंकरादिकृतम्

{॥ गजाननस्तोत्रं शंकरादिकृतम् ॥}

श्री गणेशाय नमः ।

देवा ऊचुः ।

गजाननाय पूर्णाय सांख्यरूपमयाय ते ।

विदेहेन च सर्वत्र संस्थिताय नमो नमः ॥ १॥

अमेयाय च हेरम्ब परशुधारकाय ते ।

मूषकवाहनायैव विश्वेशाय नमो नमः ॥ २॥

अनन्तविभवायैव परेशां पररूपिणे ।

शिवपुत्राय देवाय गुहाग्रजाय ते नमः ॥ ३॥

पार्वतीनन्दनायैव देवानां पालकाय ते ।

सर्वेषां पूज्यदेहाय गणेशाय नमो नमः ॥ ४॥

स्वानन्दवासिने तुभ्यं शिवस्य कुलदैवत ।

विष्ण्वादीनां विशेषेण कुलदेवाय ते नमः ॥ ५॥

योगाकाराय सर्वेषां योगशान्तिप्रदाय च ।

ब्रह्मेशाय नमस्तुभ्यं ब्रह्मभूतप्रदाय ते ॥ ६॥

Stotram Digitalized By Sanskritdocuments.org

सिद्धि-बुद्धिपते नाथ! सिद्धि-बुद्धिप्रदायिने ।

मायिने मायिकेभ्यश्च मोहदाय नमो नमः ॥ ७॥

लम्बोदराय वै तुभ्यं सर्वोदरगताय च ।

अमायिने च मायाया आधाराय नमो नमः ॥ ८॥

गजः सर्वस्य बीजं यत्तेन चिह्नेन विघ्नप!।

योगिनस्त्वां प्रजानन्ति तदाकारा भवन्ति ते ॥ ९॥

तेन त्वं गजवक्त्रश्च किं स्तुमस्तवां गजानन ।

वेदादयो विकुण्ठाश्च शंकराद्याश्च देवपाः ॥ १०॥

शुक्रादयश्च शेषाद्याः स्तोतुं शक्ता भवन्ति नः ।

तथापि संस्तुतोऽसि त्वं स्फूर्त्या त्वद्दर्शनात्मना ॥ ११॥

एवमुक्त्वा प्रणेमुस्तं गजाननं शिवादयः ।

स तानुवाच प्रीतात्मा भक्तिभावेन तोषितः ॥ १२॥

गजानन उवाच ।

भवत्कृतमिदं स्तोत्रं मदीयं सर्वदं भवेत् ।

पठते शृण्वते चैव ब्रह्मभूतप्रदायकम् ॥ १३॥

इति मौद्गलोक्तं गजाननस्तोत्रं समाप्तम् ॥

proofread by Karthik Chandan.P (kardan5380@yahoo.com)

Amith K Nagaraj (amithkn@rediffmail.com)

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Gajanana Stotram (Shankaradi Krutham) Lyrics in Devanagari PDF
% File name : shankarAdikRitaMgajAnanastotram.itx
% Location : doc_ganesha
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : http://www.webdunia.com
% Proofread by : Karthik Chandan.P : Amith K Nagaraj(amithkn at rediffmail.com)
% Description-comments : mudgalapurANa
% Latest update : March 9, 2004
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 12, 2015] at Stotram Website